अनुमन्द्रषड्जमर्हेदनुमन्द्रं पं द्वितीयका तन्त्री ।
मन्द्रं सं च तृतीया चतुर्थिका मध्यमं मन्द्रम् ॥ १९ ॥

पार्श्वे तूपरिगाऽऽद्या मन्द्रं सं मध्यमा च मन्द्रं पम् ।
अन्त्या मध्यं षड्जं श्रुत्याख्यास्तिस्र एताः स्युः ॥ २० ॥

सति वा षड्जे श्रुतयो मन्द्रे मध्ये क्रमात्सकृद् द्विश्च ।
यद्वा षड्जे मन्द्रे मध्ये तारे तथा ताः स्युः ॥ २१ ॥

अनुमन्द्रषड्जतन्त्र्यां षट् सारीः स्थापयेद्यथा स्युरिमे ।
शुद्धरिशुद्धगसाधारणमृदुमशुचिममृदुपसंज्ञाः ॥ २२ ॥

अनुमन्द्रपस्य तन्त्र्यां स्युरिमे तास्वेव षट्सु सारीषु ।
शुद्धधशुद्धनिकैशिकिमृदुसशुचिसशुद्धरिपमाख्याः ॥ २३ ॥

शुद्धौ सरी इमौ न ग्राह्यौ तन्त्र्या तृतीयया जननात् ।
अनुमन्द्रसतन्त्रीवन्मन्द्रजतन्त्र्यां स्वरास्तेषु ॥ २४ ॥

त्याज्यौ शुद्धममृदुपाविमौ चतुर्थ्यां समुद्भवाद् भूयः ।
मन्द्रमतन्त्र्यां त्वित्थं सारीषु स्युः स्वरास्तासु ॥ २५ ॥

आद्याद्वितीययोः स्तो मृदुपोज्ज्वलपौ तृतीयिकां त्यक्त्वा ।
तुर्यायां शुद्धो धः शुद्धो निः स्याच्च पञ्चम्याम् ॥ २६ ॥

षष्ठ्यां च मृदुः षड्जः कैशिक्यर्थं परान्तरा सारी ।
मेरौ च प्रतिसारि स्वरस्थितिरियं प्रमाणं हि ॥ २७ ॥

इति शुद्धमेलवीणा ।

संवादिनां समाजो रञ्जनकारी भवेदिति न्यायात् ।
ध्वनितं निःशङ्कादिभिरिहापि संवादिसांनिध्यम् ॥ २८ ॥

सपसममुख्याः संवादिनः स्वरा एकसंश्रयाः प्रायः ।
श्रुतयो द्वादश वाऽष्टौ तेषामन्तर्यतः सन्ति ॥ २९ ॥

इति संवादित्वलक्षणम् ।

किं च स्वभुवः सपमा नियतश्रुतयोऽपि कल्पिता नो तु ।
वच्मि स्फुटमिह हेतुं सारीतन्त्र्योर्विना श्लेषम् ॥ ३० ॥

अपरस्तुरीयतन्त्र्यां द्वितीयसार्यूर्ध्वमणुरवोऽस्ति समः ।
तन्मन्द्रपः स्वयंभूर्मध्ये च समध्यमौ स्वभुवौ ॥ ३१ ॥

अष्टम्यैकादश्योः सार्योरूर्ध्वं समापरध्वनितः ।
तत्तैः समाः सपसमाः स्वयंभुवो मुक्ततन्त्रीजाः ॥ ३२ ॥

ये रिधरिमृदुपमुख्यास्तन्मूलं स्थापिता यथाशास्त्रम् ।
तेऽपि स्वयंभुव इवाष्टम्यूर्ध्वं तिसृषु तन्त्रीषु ॥ ३३ ॥

पूर्ववदपराच्च रवात्पगपैस्तत्रोचितैः समात्क्रमतः ।
श्रुत्यैकयाऽधिकत्वं न्यूनत्वं वा न दोषाय ॥ ३४ ॥

अनुमन्द्रमन्द्रतारेष्विति स्थितिरपि स्वरस्वरूपविदाम् ।
स्वधिया मयेति गदितं तत्प्रामाण्यं निजानुभवात् ॥ ३५ ॥

इति स्वयंभुवः ।

अनुमन्द्रमन्द्रयोरिति ते द्वादश मेरुसारिकासूक्ताः ।
तन्मानतः स्वराणां सार्योऽत्र च मध्यताराणाम् ॥ ३६ ॥

स्थाप्याश्चतुर्दशान्येऽतितारषड्जार्थमपि परामाहुः ।
मध्यास्ताराश्च परं तेन ग्राह्यास्तुरीयतन्त्रीजाः ॥ ३७ ॥

अन्तरकाकल्यौ तीव्ररिधौ तीव्रतममध्यमश्चेति ।
पञ्च न किं द्वादशवत्सारीषूक्ता ब्रुवे तत्र ॥ ३८ ॥

साधरणादिसारीष्वपकर्षादधिकिता यदा श्रुतयः ।
पञ्च तदान्तरमुख्या इह स्युरिति ताः पृथङ् नोक्ताः ॥ ३९ ॥

केचन मध्यमतन्त्रीनिषादसार्यां प्रवेशतां ब्रुवते ।
कैशिकिकाकल्यावपि सार्यूनैका मते तेषाम् ॥ ४० ॥

अत्राङ्गमन्द्रषड्जस्थाने त्वनुमन्द्रमध्यमोऽप्यस्ति ।
मध्यममृदुपौ तत्र ग्राह्यौ नान्ये पतन्त्र्यां ते ॥ ४१ ॥

ननु तनुवीणे तुल्ये गदिते शास्त्रेऽत्र नादसंवादात् ।
मन्द्रादित्रयमर्हं तनुवत्तत्रानुमन्द्र इह ॥ ४२ ॥

नादोऽतिसूक्ष्मतया नाभौ वर्त्तेति शार्ङ्गदेवेन ।
सूचित इहानुमन्द्रो वीणार्होऽयं तदुक्तोऽत्र ॥ ४३ ॥
इति पुनरपि शुद्धमेलवीणा ।

अथ मध्यमेलवीणा लक्ष्यत इतरात्र चतसृषूर्ध्वासु ।
मेढकतस्तन्त्रीषु ज्ञेया त्वाद्यानुमन्द्रपगा ॥ ४४ ॥

मन्द्रसयुता द्वितीया तृतीयिका मन्द्रपञ्चमं दधती ।
तुर्या समध्यषड्जा तिस्रः श्रुतयस्तु पार्श्वस्थाः ॥ ४५ ॥

मन्द्रसमन्द्रपमध्यसयुक्ताः क्रमतः स्वरस्थितिः सैव ।
सारीषड्जे तेषु प्रामाण्यं पूर्ववर्त्कि तु ॥ ४६ ॥

पञ्चमतन्त्रीजतरी तदप्रयोज्यौ पुनः सतन्त्र्योर्यत् ।
तत्संख्याश्च न सार्योऽतितारगाः परमते शिष्टाः ॥ ४७ ॥

इयमपि सयुताऽन्यमते पञ्चमतन्त्रीषु पूर्ववच्छेषम् ।
त्याज्यौ मन्द्रसतन्त्र्याः शुद्धममृदुपौ मतन्त्र्यां यत् ॥ ४८ ॥

पूर्वास्तिस्रस्तन्त्रीर्विनात्र तन्त्र्यां तु मध्यषड्जस्य ।
त्रिस्थानस्वरसिद्ध्यै स्थाप्यन्ते सारिकाः कैश्चित् ॥ ४९ ॥

अतितारपञ्चमादा वामे पार्श्वे श्रुतिस्तु मन्द्रसयुक् ।
दक्षिणपार्श्वे मध्यसतारसयुक्ते श्रुती वास्याम् ॥ ५० ॥

तन्त्र्यां मन्द्रत एकेऽतितारमपि कृत्रिमोक्तितः प्राचाम् ।
किं त्वतितीव्रे नादे न स्वरता रञ्जनाभावात् ॥ ५१ ॥
इति मध्यमेलवीणा ।

अन्येऽपि सन्ति भेदा अतिप्रसिद्धास्ततो नोक्ताः ।
सप्रामाण्यो भेदः परं त्वनुक्तोऽप्युपादेयः ॥ ५२ ॥

इति श्रीसोमनाथनिर्मिते रागविबोधे
द्वितीयो विवेकः समाप्तः ।

तृतीयो विवेकः

मेलाः

अथ कथ्यन्ते मेलाः क्रमरूपास्ते भवन्ति स्वरसाङ्काः ।
पञ्चदशभी रिगमधनिभेदैर्नियतश्रुतितया च ॥ १ ॥

तीव्ररितीव्रतररितीव्रतमरिसाधारणान्तरा मृदुमः ।
तीव्रतमगतीव्रतममसृदुपा धौ तीव्रतीव्रतरौ ॥ २ ॥

तीव्रतमधकैशिकिनौ काकल्यथ मृदुस इत्यमी क्रमतः ।
तीव्ररिमुखं त्रिभिद्रेभेदाः साधारणप्रमुखाः ॥ ३ ॥

गस्य मताश्चत्वारस्तीव्रतममुखौ मतौ मस्य ।
तीव्रधमुखाश्च धस्य त्रयस्त्रयः कैशिकिमुखा नेः ॥ ४ ॥
इति पञ्चदश रिगमधनिभेदाः ।

उक्ता मृदुमो गभिदा मृदुपो मभिदा च नेर्भिदा मृदुसः ।
पूर्वान्पञ्चदशभ्यः स्वरान्ब्रुवे भेदभेदकरान् ॥ ५ ॥

तीव्ररिमुखत्रयात्सः साधारणमुखचतुष्टयादृषभः ।
स्याद्गस्तीव्रतममुखयुगलात्तीव्रधमुखत्रयतः ॥ ६ ॥

पूर्वं पञ्चम उक्तः कैशिक्यादेस्त्रिकाच्च धः शुचिवत् ।
एवं यथा तथैते भिद्भ्यः पूर्वं स्वरा नियताः ॥ ७ ॥
इति टीका ।

एकद्वित्रिचतुःपञ्चभिदास्तिथयोऽङ्ककरि च भूरसदृक् ।
गजगिरिगुणाश्च नृपदृक्क्रमतो मेला अभिच्चेन्दुः ॥ ८ ॥
इति मेलसंख्या ।

पेन्द्रदशैते भेदा एकाद्यङ्काभिधा ब्रुवेंऽशाङ्कान् ।
संख्याहेतूनेकाद्यद्याद्यप्रमुखमेलदिशः ॥ ९ ॥

एकभिदां पञ्चाद्या एकाङ्काः पञ्चदश ततो द्विभिदाम् ।
रवयस्त्रिधा चतुर्धा इभा द्विधा षट् त्रिधा रामाः ॥ १० ॥

त्रिभिदां त्रिधाऽग्निबाणाः कुदृक् चतुर्धा नव द्विधा गदिताः
त्रेधा चतुर्भिदां दृग् दिशश्चतुर्धा गजक्षितयः ॥ ११ ॥

पञ्चभिदां दृग्गिरयस्त्रिधेति यदि पूर्वसंख्योना ।
सस्थानैः स्वैरङ्कैस्तज्जनयेत्परपरांशाङ्कान् ॥ १२ ॥

इति मेलांशाङ्काः ।

एकश्चत्वारोऽष्टौ दश त्रयोदश च मूलपङ्क्तिः सा ।
न्यस्या प्रस्तारार्थं सैवैकैकाधिकाऽन्ते च ॥ १३ ॥

तिथ्यङ्कादा चाधोऽध उपान्त्ये सैकिताऽखिलाधःस्था ।
अग्रे मूलाङ्कवती पङ्क्तिरधः प्राग्विवाधोऽधः ॥ १४ ॥

सैकोपान्त इति प्राग्वदुपान्त्ये द्वादशाङ्केऽधःस्था ।
अन्त्यात्तृतीय एकस्थाऽग्रे मूलाङ्कवत्येव ॥ १५ ॥

पूर्ववदखिलं भूयोऽधःस्थान्त्यतृतीयगे नवाङ्के तु ।
सैकान्त्यतुरीयेऽग्रे मूलाङ्कवती पुनः प्राग्वत् ॥ १६ ॥

सप्ताङ्केऽन्त्यात्तुर्येऽधःपङ्क्तिस्त्वन्त्यपञ्चमे सैका ।
शेषं पूर्ववदेवं प्रस्तारो द्व्यादिभेदानाम् ॥ १७ ॥

इति मेलप्रस्तारः ।

नष्टाङ्के स्वांशाङ्काः पात्या एकाद्यमुखदिशो लेख्याः ।
पङ्क्तिः शेषभिदाद्या मूलाख्या, त्वन्यथैकाद्या ॥ १८ ॥

प्राच्यप्राच्यांशाङ्कैः शेषं शेषं सकृत्सकृत्त्याज्यम् ।
दृष्टभिदोऽधोऽधःस्थैरप्रथमैर्लब्धयोग्यैः ॥ १९ ॥

रङ्क्यं तथैव शेषं यथा तु तद्योगतोऽन्तिमे न भवेत्
समतोनता च पूर्वेणैकस्वरभेदताऽवसितौ ॥ २० ॥

क्रमतोऽन्त्यात्तुर्यादिषु लब्धं योज्यं चतुर्भिदादिभवैः ।
भागेऽशाङ्कैरन्ते च शेषपातं तथैकोनम् ॥ २१ ॥

इति नष्टः ।

यद्भेदाद्युद्दिष्टं तद्भेदाद्येव मूलमुल्लेख्यम् ।
एकाङ्कैर्यावद्भिर्मूलाद् वृद्धाभिदा अस्य ॥ २२ ॥

प्राच्यप्राच्यांशाङ्कास्तावन्तो नष्टवत्तु लभ्येरन् ।
शेषैः स्वांशाङ्कैः सह लब्धैक्ये सैकमुद्दिष्टम् ॥ २३ ॥

इति उद्दिष्टः ।

एकश्रुतिस्थभेदद्वयानिषुदिशस्त्यजेदिह तु मेलान् ।
क्रमसपुनरुक्तिकूटवदुक्तान्प्रस्तारसिद्ध्यर्थम् ॥ २४ ॥

इति त्यक्तमेलाः ।

संख्याप्रस्तारादि प्रोक्तमिति मया प्रसङ्गतः कुतुकात् ।
अनुपेक्ष्यं गुणगृह्यैः प्राचीनानुक्तमपि विबुधैः ॥ २५ ॥

इति ग्रन्थकर्तुः प्रार्थना ।

तेषु प्रसिद्धरागैर्विशेषितां विंशतिं ब्रुवे ह्यधिकाम् ।
निर्भेद एक एकभिदौ द्वौ द्विभिदस्तु सप्तैव ॥ २६ ॥

चत्वारस्त्रिविभेदाश्चतुर्भिदोऽष्टौ च पञ्चभिद एकः ।
तत्तन्मेलेष्वधिकाधिकसंख्यास्तेऽथ रागांस्तान् ॥ २७ ॥

वन्हिमुखारी रेवादिगुप्तिरथ सामपूर्वकवराली ।
तोडीनादादिकरामक्रीभैरववसन्ताश्च ॥ २८ ॥

भैरव्याद्यवसन्ता मालवगौडोऽथ रीतिगौडश्च ।
आभीरनाटहम्मीरवराख्यः शुद्धरामक्रीः ॥ २९ ॥

श्रीरागः कल्याणः काम्बोदी मल्लवैरिसामन्तौ ।
कर्णाटो देशाक्षी शुद्धो नाटश्च सारङ्गः ॥ ३० ॥

इति रागा नामकरा मेलानां गुणदशामथ क्रमतः ।
तांस्तु मुखारीमेलप्रभृतीन्वक्ष्यामि लक्षणतः ॥ ३१ ॥
इति मेलानामुद्देशः ।

सन्ति मुखारीमेले शुद्धाः षड्जादयः स्वराः सप्त ।
स्यादेषाऽस्मान्मेलात्तुरुष्कतोड्यादिरागाश्च ॥ ३२ ॥
इति मुखारीमेलः ॥ १ ॥

मेलेऽथ रेवगुप्तेर्भवन्ति षट् सरिमपधनयः शुद्धाः ।
गोऽन्तरसंज्ञश्चास्माद्रागाः स्यू रेवगुप्त्याद्याः ॥ ३३ ॥
इति रेवगुप्तिमेलः ॥ २ ॥

सामवरालीमेले शुद्धाः सरिगमपधाश्च काकलिका ।
अस्मादियं वसन्तवराट्याद्याश्चापरे रागाः ॥ ३४ ॥
इति सामवरालीमेलः ॥ ३ ॥

तोडीमेले साधारणकैशिकिनौ च शुद्धसरिमपधाः ।
तोडीप्रमुखा रागा मेलात्प्रादुर्भवन्त्यस्मात् ॥ ३५ ॥
इति तोडीमेलः ॥ ४ ॥

नादादिमरामक्रीमेले साधारणश्च मृदुसः स्यात् ।
शुद्धा अपि सरिमपधा अस्मादेतन्मुखा रागाः ॥ ३६ ॥
इति नादरामक्रीमेलः ॥ ५ ॥

भैरवमेले शुद्धाः सरिमपधा अन्तरश्च कैशिकनिः ।
भैरवपौरविकाद्या रागा मेलादतस्तु स्युः ॥ ३७ ॥
इति भैरवमेलः ॥ ६ ॥

शुद्धा वसन्तमेले सरिमपधा अन्तरश्च काकलिका ।
अस्माद्वसन्तटक्कहिजेजाहिन्दोलमुख्याश्च ॥ ३८ ॥
इति वसन्तमेलः ॥ ७ ॥

मेले वसन्तभैरविकायाः शुद्धाः सरिमपधा मृदुमः ।
कैशिक्यपीयमस्मान्मारव्यथ मेलतोऽन्ये च ॥ ३९ ॥
इति वसन्तभैरवीमेलः ॥ ८ ॥

मालवगौडकमेले सरिमपधा एव पञ्च शुद्धाः स्युः ।
मृदुमध्यममृदुषड्जौ चास्मान्मेलाद्भवन्तीमे ॥ ४० ॥
मालवगौडो गौड्यौ पूर्वी पाडी च देवगान्धारः ।
गौडक्रिया कुरञ्जी बहुली रामक्रिया चापि ॥ ४१ ॥
पावक आसावरिका पञ्चमबङ्गालशुद्धललिताश्च ।
गुर्जरिकापरजाख्यौ विशुद्धगौडादिकाश्चान्ये ॥ ४२ ॥
इति मालवगौडमेलः ॥ ९ ॥

अथ रीतिगौडमेले पञ्च भवेयुः सरिगमपाः शुद्धाः ।
तीव्रतरधकैशिकिनौ चैतत्प्रमुखा भवन्त्यस्मात् ॥ ४३ ॥
इति रीतिगौडमेलः ॥ १० ॥

आभीरनाटमेले शुद्धसमपधाश्च तीव्रतररिषभः ।
साधारणमृदुसौ चेत्यतः स्युराभीरनाटाद्याः ॥ ४४ ॥
इति आभीरनाटमेलः ॥ ११ ॥

हम्मीरमेल उज्ज्वलसमपधतीव्रतररिमृदुममृदुसकाः ॥
हम्मीरविहङ्गडकेदारप्रमुखा अतो मेलात् ॥ ४५ ॥
इति हम्मीरमेलः ॥ १२ ॥

शुद्धवराटीमेले साधारणतीव्रतममम्मृदुसाः स्युः ।
शुच्यथ सरिपधमसाद्भवन्ति रागा वराट्याद्याः ॥ ४६ ॥
इति शुद्धवराटीमेलः ॥ १३ ॥

शुचिरामक्रीमेले मृदुमकतीव्रतममम्मृदुसाः शुद्धम् ।
सरिपधमियमत्र ललितजैताश्रीनावणीदेश्यः ॥ ४७ ॥
इति शुद्धरामक्रीमेलः ॥ १४ ॥

श्रीरागमेलके रिस्तीव्रः साधारणोऽथ धस्तीव्रः ।
कैशिक्यपि शुचिसमपा मेलादस्माद्भवन्त्येते ॥ ४८ ॥
श्रीरागमालवश्रीधन्याश्यो भैरवी तथा धवला ।
सैन्धव्याद्याश्चान्ये देशविशेषैर्विभिन्नाख्याः ॥ ४९ ॥
इति श्रीरागमेलः ॥ १५ ॥

कल्याणस्य तु मेले शुचयः सपधा रिरस्ति तीव्रतरः ।
साधारणश्च मृदुपो मृदुसोऽस्मिन्नेव इतरे च ॥ ५० ॥
इति कल्याणमेलः ॥ १६ ॥

काम्बोदीमेले तीव्रतररिरन्तरकतीव्रतरधौ च ।
काकलिका शुचिसमपा अतश्च काम्बोददेवक्रि ॥ ५१ ॥
इति काम्बोदीमेलः ॥ १७ ॥

मल्लारिमेल उक्तास्तीव्रतररिमृदुमतीव्रतरधाश्च ।
मृदुसः शुद्धाः समपा अस्मादेते तु मल्लारिः ॥ ५२ ॥
नट्युक् स पूर्वगौडो भूपालीगोण्डशंकराभरणाः ।
नटनारायणनारायणगौडौ कोऽपि केदारः ॥ ५३ ॥
सालङ्कनाटवेलावल्यावथ मध्यमादिरागश्च ।
सावेरी सौराष्ट्री जायन्तेऽन्येऽपि देशीस्थाः ॥ ५४ ॥
इति मल्लारिमेलः ॥ १८ ॥

सामन्तस्य हि मेले शुचिसमपास्तीव्रतमरिरन्तरकः ।
तीव्रतमधकाकल्यावसादेतन्मुखा रागाः ॥ ५५ ॥

इति सामन्तमेलः ॥ १९ ॥

कर्णाटगौडमेले शुचिसमपास्तीव्रतमरिर्मृदुमौ च ।
तीव्रधकैशिकिनौ स्युर्मेलादस्मादिमे रागाः ॥ ५६ ॥

कर्णाटगौडकोऽड्डाणो नागध्वनिविशुद्धबङ्गालौ ।
वर्णादिनाट इतरे तुरुष्कतोड्याद्रिकाश्च स्युः ॥ ५७ ॥

इति कर्णाटगौडमेलः ॥ २० ॥

देशाक्षीमेले शुचिसमपार्स्तीव्रतमरिस्तथा मृदुमः ।
तीव्रतरधमृदुसावत एषाऽन्ये चापि रागाः स्युः ॥ ५८ ॥

इति देशाक्षीमेलः ॥ २१ ॥

मेलेऽथ शुद्धनाट्याः शुचिसमपास्तीव्रतमरिर्मृदुमौ च ।
तीव्रतमधमृदुसमतो रागाः स्युः शुद्धनाटाद्याः ॥ ५९ ॥

इति शुद्धनाटमेलः ॥ २२ ॥

सारङ्गरागमेले तीव्रतररितीव्रतमगमृदुपाश्च ।
तीव्रतमधमृदुसौ शुचि सपमत एतन्मुखा रागाः ॥ ६० ॥

इति सारङ्गमेलः ॥ २३ ॥

इति श्रीसोमनाथनिर्मिते रागविबोधे तृतीयो
विवेकः समाप्तः ।

चतुर्थो विवेकः ।

रागाः ।

स्वरवर्णभूषितो यो ध्वनिभेदो रञ्जकः स राग इह ।
बहुविधसंख्याः प्राचां मतैरनेकैः प्रसिद्धा ये ॥ १ ॥

इति रागः ।

देशजनुषोऽप्रसिद्धास्तेऽब्धितरङ्गा इव त्वसंख्याताः ।
शुद्धच्छायालगसंकीर्णतया त्रिविधताऽस्त्येषाम् ॥ २ ॥

शुद्धो रञ्जनकारी स्वेन च्छायालगः पराश्रयतः ।
संकीर्णस्तूभयथा मतमुदितमुमापतेरेवम् ॥ ३ ॥

इति रागाणां शुद्धादित्रिविधता ।

येऽत्रालापालप्तिप्रबन्धयोग्यास्त उत्तमाः कथिताः ।
अपि तादृक्षा येऽल्पप्रचारिणो मध्यमास्ते स्युः ॥ ४ ॥

अपि बहुतरप्रचारास्तदयोग्यास्तेऽधमा इति त्वन्ये ।

इति रागाणामुत्तमादित्रिविधता ।

यद्यपि देशीरागा देशे देशेऽन्यवेलाख्याः ॥ ५ ॥
पूर्णौडुवषाडवतास्वंशन्यासग्रहेषु चानियताः ।

तदपि ग्रहादि पूर्णत्वादि च बहुमतजमनुसृत्य ॥ ६ ॥
मेले प्रसङ्गत इहोद्दिष्टानां लक्षणंससंक्षेपम् ।

तेषां पूर्वं वक्ष्यामि गानवेलासमायुक्तम् ॥ ७ ॥

इति देशीरागास्तेषां च त्रिविधता ।

पूर्णा नित्यं गेया सांशन्यासग्रहा मुखारीयम् ।
पूर्णा तुरुष्कतोडी गांशादिः संगवे कम्प्रा ॥ ८ ॥

इति मुखारी तुरुष्कतोडी च ।

असपा तु रेवगुप्ती रिन्यासांशग्रहा भवेत्सायम् ।
सततं सामवराली सांशन्यासग्रहा पूर्णा ॥ ९ ॥
इति रेवगुप्तिः सामवराली च ।

गांशग्रहा किल वसन्तवराली सर्वदाऽरिपा सान्ता ।
गाद्यंशसान्तपूर्णा तोडी कम्प्राऽणुसंगवरुक् ॥ १० ॥
इति वसन्तवराली तोडी च ।

सांशन्यासग्रहका पूर्णोल्लसति निशि नाद्रामक्रीः ।
धांशग्रहसन्यासः संपूर्णो भैरवः प्रातः ॥ ११ ॥
इति नाद्रामक्रीभैरवश्च ।

सन्यासग्रहमांशा स्वल्परिपा पौरवी लसेत्प्रातः ।
सांशन्यासग्रहको वसन्त उपसि विलसेत्पूर्णः ॥ १२ ॥
इति पौरवी वसन्तश्च ।

गेयः पूर्णष्टक्कः सांशन्यासग्रहो दिनस्यान्ते ।
मांशग्रहसन्यासोऽखिलो हिजेजस्तु सायाह्ने ॥ १३ ॥
इति टक्को हिजेजश्च ।

हिन्दोलो रिपहीनो मांशः सान्तग्रहः सदोषसि वा ।
पोना वसन्तभैरव्युषसि तु सांशग्रहन्यासा ॥ १४ ॥
इति हिन्दोलो वसन्तभैरवी च ।

रिधहीना शाश्वतिकी सान्ता गांशग्रहा तु मारविका ।
मालवगौडः पूर्णः प्रदोषशोभोऽथ वा रहितः ॥ १५ ॥

गान्धारधैवताभ्यां निन्यासांशग्रहोऽथ वा सान्तः ।
गौड्यधगा सायाह्ने यंशा चैती च सान्तादिः ॥ १६ ॥

इति मारविकामालवगौडगौडीचैत्यः ।

पूर्वी पूर्णा सान्ता गांशा षड्जग्रहा च सायाह्ने ।
पाडी सायाह्नार्हा गोना सांशग्रहन्यासा ॥ १७ ॥

इति पूर्वी पाडी च ।

रिग्रहपांशः सान्तः सदाऽगनिर्देवगान्धारः ।
गौडक्रिया धरिक्ता सांशन्यासग्रहा प्रातः ॥ १८ ॥

इति देवगान्धारो गौडक्रिया च ।

गेया सदा कुरञ्जी धाल्पा सांशग्रहा च सन्यासा ।
असनिरपराह्णगेया सांशन्यासग्रहा बहुली ॥ १९ ॥

इति कुरञ्जी बहुली च ।

संपूर्णा रामक्रीः सांशान्तादिः सदाऽपि गांशाद्या ।
गाद्यो धांशः सान्तो निविरहितः पावकः शश्वत् ॥ २० ॥

इति रामक्रीः पावकश्च ।

आसावरी प्रगेया माद्यांशा सान्तिमा सदा पूर्णा ।
पञ्चम ऋषभविहीनः पांशन्यासग्रहो ह्युषसि ॥ २१ ॥

इत्यासावरी पञ्चमश्च ।

बङ्गालः शाश्वतिकः पूर्णः सांशग्रहश्च सन्यासः ।
उषसि तु पूर्णाऽपा वा सांशान्त्याद्या शुचिर्ललिता ॥ २२ ॥

इति बङ्गालः शुद्धललिता च ।

गुर्जरिका रिन्यासग्रहांशका पविसुता प्रभाताहीं ।
परजो न्यल्पो गांशग्रहधगकम्प्रः सदा सान्तः ॥ २३ ॥
इति गुर्जरिका परजश्च ।

न्यल्पः प्रदोपशाली शुचिगौडः पांशसादिसन्यासः ।
पूर्णस्तु रीतिगौडो न्यंशान्त्यादिश्च सायाह्ने ॥ २४ ॥
इति शुद्धगौडरीतिगौडौ ।

आभीर्यपि प्रदोषे पूर्णा गांशग्रहा च सन्यासा ।
गग्रहपांशः सन्यासो हम्मीरोऽल्पनी रात्रौ ॥ २५ ॥
इत्याभीरीहम्मीरश्च ।

न्यंशग्रहसन्यासोऽल्पधो लसेन्निशि विहङ्गडः कम्प्रः
केदारोऽल्परिधो निशि सन्यासो गांशगग्रहकः ॥ २६ ॥
इति विहङ्गडकेदारौ ।

शुद्धवराटी पूर्णा सांशान्ता रिग्रहा च मध्याह्ने ।
सांशाद्यन्तोऽह्नोऽन्तः कम्प्रमनिर्देशकृत्पूर्णः ॥ २७ ॥
इति शुद्धवराटी देशकारश्च ।

ललित उषसि संपूर्णो धांशः सान्तग्रहः पहीनो वा ।
सन्यासग्रहगांशाऽल्परिधा प्रातस्तु जैताश्रीः ॥ २८ ॥
इति ललितो जैताश्रीश्च ।

सन्यासरिग्रहांशा संपूर्णा लावणी तु सायाह्ने ।
रिग्रहरिन्यासांशा गाल्पा देशी सदा गेया ॥ २९ ॥
इति लावणी देशी च ।

यंशग्रहः प्रदोषे श्रीरागो गलधगो न वा सान्तः
सग्रहसांशन्यासा मालाश्रीर्निग्रहांशा वा ॥ ३० ॥

पूर्णाऽथ वा रिधाल्पा गेयाऽऽदौ मङ्गलाय शाश्वतिकी ।
धन्याशिका रिधोना सांशन्यासग्रहा प्रातः ॥ ३१ ॥
इति श्रीरागमालाश्रीधन्याशिकाः ।

भैरव्यंशन्यासग्रहसा रिपमुद्रिता सदा पूर्णा ।
नित्यं पमुद्रिताऽरिधलांशन्यासग्रहा धवला ॥ ३२ ॥
इति भैरवी धवला च ।

सैन्धव्यगनिर्नित्यं सांशन्यासग्रहा लसद्गमका ।
साद्यन्तगांशपूर्णः प्रदोषगेयश्च कल्याणः ॥ ३३ ॥
इति सैन्धवी कल्याणश्च ।

पूर्णा सादिरनिर्वा काम्बोद्यंशान्तसा च सायाह्ने ।
अपराह्णे देवक्रीः सांशन्यासग्रहाऽपा वा ॥ ३४ ॥
इति काम्बोदी देवक्रीश्च ।

मल्लारिर्नटयुगपि स धांशान्तादिरगनिश्च संगवभाः ।
सान्तादिगांशपूर्णो मध्याह्ने पूर्वगौडः स्यात् ॥ ३५ ॥
इति मल्लारिनटमल्लारिपूर्वगौडाः ।

सन्यासग्रहगांशा मनिहीनोषःस्मृतेह भूपाली
न्यल्पो मध्याह्नार्हो धांशन्यासग्रहो गोण्डः ॥ ३६ ॥
इति भूपाली गोण्डश्च ।

पूर्णः सांशन्यासः सग्रह उषसीह शंकराभरणः ।
सान्तादिगांशपूर्णो नटनारायण इने नमति ॥ ३७ ॥
इति शंकराभरणो नटनारायणश्च ।

नारायणगौड उषसि गांशन्यासग्रहस्तथा गतरिः ॥
न्यंशन्यासग्रहकः पूर्णो निश्येव केदारः ॥ ३८ ॥
इति नारायणगौडो द्वितीयकेदारश्च ।

सालङ्गनाट आढ्यः सांशन्याशग्रहस्तु सायाह्ने ।
धांशान्तादिः पूर्णाऽरिपाऽपि वेलावली व्युष्टे ॥ ३९ ॥
इति सालङ्गनाटो वेलावली च ।

अरिधो मांशन्यासग्रहः प्रगे मध्यमादिरुद्गेयः ।
असपा धांशन्यासग्रहा प्रभाते तु सावेरी ॥ ४० ॥
इति मध्यमादिः सावेरी च ।

सौराष्ट्री संपूर्णा सांशन्यासग्रहा च सायाह्ने ।
सामन्तः सायाह्ने सांशन्यासग्रहः पूर्णः ॥ ४१ ॥
इति सौराष्ट्री सामन्तश्च ।

कर्णाटो निशि पूर्णो निन्यासांशग्रहः क्वचिद्द्रिधमुक् ।
पूर्णोऽड्डाणः पाद्यो धांशः सन्यास उल्लसेद्दावौ ॥ ४२ ॥
इति कर्णाटोऽड्डाणश्च ।

नागध्वनिरिह पूर्णः सांशन्यासग्रहः सदा गेयः
शुचिबङ्गालः पूर्णो मांशन्यासग्रहो व्युष्टे ॥ ४३ ॥
इति नागध्वनिः शुद्धबङ्गालश्च ।

पूर्णोऽथ वर्णनाटः सांशन्यासग्रहो निशा गेयः ।
कम्प्रा तुरुष्कतोडी निशि मांशान्तग्रहा पूर्णा ॥ ४४ ॥
इति वर्णनाटस्तुरुष्कतोडी च ।
(इराख वा)

गांशन्यासग्रहकाऽऽरोहे तु गतमनिरुपसि देशाक्षी ।
नाटः शुचिः प्रदोषे सांशन्यासग्रहः पूर्णः ॥ ४५ ॥
इति देशाक्षी शुद्धनाटश्च ।

संपूर्णः सारङ्गः सांशन्यासग्रहोऽपराह्णरुचिः ।
इति सारङ्गः

लक्षणसमास एवं दृष्ट्वा नानाक्तान्युक्तः ॥ ४६ ॥

मेलग्रहादिपूर्णत्वाधिक्येऽप्येषु वादनभिदा भित् ।
वर्ज्यस्वरोऽवरोहे द्रुतगीतो नेह रक्तिहरः ॥ ४७ ॥

इति श्रीसोमनाथनिर्मिते रागविबोधे ।

चतुर्थो विवेकः समाप्तः ॥

पञ्चमो विवेकः

रागरूपाणि

तेष्विति मेलक्रमतः समासतो लक्षितेष्वहं कतिचित्
तानुद्दिशामि कालक्रमतो व्यासेन लक्षयितुम् ॥ १ ॥

शंकरभूषणवेलावल्यौ भूपालिका शुचिर्ललिता ।
सवसन्तो हिन्दोलो विभासललितश्च जैताश्रीः ॥ २ ॥

धन्याशीभैरवपौरविकास्तोडी तुरुष्कतोड्यन्या ।
मल्लारिर्नटपूर्वः स च गोण्डः पूर्वगौडश्च ॥ ३ ॥

देशीकारः शुद्धवराटी बहुली ततश्च सारङ्गः ।
नटनारायणदेवक्रियौ र्च सौराष्ट्रिका गौडी ॥ ४ ॥

चैत्तीपूर्वीलावणि काम्बोदी शुद्धनाट आभीरी ।
कल्याणः श्रीरागो मालवगौडोऽथ गौडश्च ॥ ५ ॥

कर्णाटाड्डाणौ वर्णनाटहम्मीरकौ च केदारः ।
सविहङ्गड इत्युष आद्यष्टसु कालेषु गातव्याः ॥ ६ ॥

इति कालक्रमतो रागाणामुद्देशः ।

शंकरभूषाद्या उषसि हि जैताश्रीमुखास्ततः प्रातः ।
संगव इह तोड्याद्या मध्याह्ने गोण्डकप्रमुखाः ॥ ७ ॥

अपराह्णे बहुलीतः प्रभृति च सायाह्नके तु सौराष्ट्र्याः ।
शुचिनाटतः प्रदोषे निशि कर्णाटात्सदा त्वेते ॥ ८ ॥

मालाश्रीर्धवलाऽथ मुखारी रामक्रिया सपावकका ।
सैन्धव्यासावरिका गान्धारो मारवी परजः ॥ ९ ॥

निजनिजकालेऽप्येते क्रमतो गेया अथ क्रमाद्विविधैः ।
आर्याच्छन्दोबद्धैर्लक्ष्य एताम्परं रूपैः ॥ १० ॥

इति रागाणां कालाः ।

सुस्वरवर्णविशेषं रूपं रागस्य बोधकं द्वेधा ।
नादात्म च देवमयं तत्क्रमतोऽनेकमेकं च ॥ ११ ॥

इति रूपस्य समान्यलक्षणम् ।

तत्र विविच्यत आद्यं लोकव्यवहारविश्रुतं पूर्वम् ।
अपि यस्य कस्यचिद्यत्पर्यायः स्वरसमूहस्य ॥ १२ ॥

आलापमूर्च्छनाश्रुतितानालंकारकूटतानाद्याः ।
तत्संकराश्च रूपैरग्रे ज्ञेयाः क्वचित्केऽपि ॥ १३ ॥

इति नादात्मरूपविशेषः ।

वादनभिदास्वनन्तास्वभिधास्ये विंशतिं स्फुटं देश्याम्
स्थाने च द्वे द्वाविंशत्या नाम्नां प्रकल्पितया ॥ १४ ॥

प्रत्यान्वपूर्वहतयः पीडादोलनविकर्षगमकानि ।
कम्पो घर्षणमुद्रे स्पर्शो नैम्न्यप्लुतिद्रुतयः ॥ १५ ॥

परतोच्चताऽथ निजते शमम्मृदुकठिनानि विंशतिर्द्व्यधिका ।
वादनभेदपदानां वीणायां लक्षणं क्रमतः ॥ १६ ॥

इति वादनभेदानामुद्देशः ।

प्रतिहतिरन्तर्द्रुतमुच्छलनवतो हतियुगाद्गभीररवः ।
आहतिरन्यध्वनने हतिं विनाऽन्दस्वराश्रावः ॥ १७ ॥

इति प्रतिहतिराहतिश्च ।

अनुहतिरेकहतेः प्रतिहतिवत्सैव त्वहतिरघातात्स्याद् ।
पीडाऽऽपीड्य विमुक्तिर्दोलनमाकर्षणागमने ॥ १८ ॥

इत्यनुहत्यहति पीडादोलनानि ।

आकर्षणं विकर्षो दोलनमेव हि पुनः पुनर्गमकम् ।
स्पष्टः कम्पो घर्षणमेकहतिर्द्राक्स्वरान्तरकृत् ॥ १९ ॥

इति विकर्षगमककम्पघर्षणानि ।

मुद्रा परैकहननात्प्रदर्श्य पूर्वं पुनस्तदाच्छादः ।
आहतिरेव स्पर्शो द्रुतमुक्ता दृढहतिर्नैम्न्यम् ॥२० ॥

इति मुद्रा स्पर्शो नैम्न्यं च ।

प्लुतिरग्रस्वरघर्षो द्रुतिस्त्वरावादनं ततः परता ।
पूर्वेऽग्रयस्याकर्षणमथोच्चता तत्तृतीयस्य ॥ २१ ॥

इति प्लुतिद्रुतिपरतोच्चताः ।

निजते तु तयोः पौर्व्यं क्वापि सघाते शमो विलम्बः स्यात् ।
मृद्विह मन्द्रे स्थाने कठिनं तारमथ संकेताः ॥ २२ ॥

इति निजते शमो मृदु कठिनं च ।

अत्याग्वपूर्वकहतिषु बिन्दू बिन्दुः स रेखया द्विगुणः ।।
सोऽधः सोऽग्रे शुद्धः पीडायां दोलने तु गुरुः ॥ २३ ॥

ऊर्ध्वं उपरि स च तिर्यग्विकर्षं ऊर्ध्वं स गमक ऊर्ध्वोऽग्रे ।
कम्पे रेखोर्ध्वोर्ध्वं तिर्यक्सा घर्षणे शिरसि ॥ २४ ॥

मुद्रायां सैवाधः स्पर्शोऽथो अर्धचन्द्र ऊर्ध्वे स्यात् ।
नैम्न्ये सोऽधः सोऽग्रे प्लुत्यां स्वरशृङ्खला द्रुत्याम् ॥ २५ ॥

परतायां तु गुरुरधःस्थायी तिर्यक्स्त्र उच्चतायां तु ।
ऊर्ध्वाधोऽथ निजतयोः परताया उच्चताया वा ॥ २६ ॥

लम्बोर्ध्वबिन्दु चिह्नं लम्बो बिन्दुः शमे भवेत्पुरतः ।
उपरि स तूर्ध्वो मृदुनि च कठिने तिर्यक्स्त्र ऊर्ध्वे स्यात् ॥ २७ ॥

इति संकेतेष्वेको द्वौ बहवो वा स्वरे स्युरेकस्मिन् ।
यत्रैकवादनं द्विस्तत्संकेतोऽपि तत्र द्विः ॥ २८ ॥

लम्बेन बिन्दुनोनाः शीर्षे मध्यस्वरा इह ज्ञेयाः ।
प्रारब्धरूपपूर्तौ पश्चाकारश्च संकेतः ॥ २९ ॥

यथा—स॒ । स॒ । स । स॒ । स° । स॑ । स । सऽ । सं । स॑ । स॒ ।

सँ । स॒ । स᷈ । सरिग । स । स । स । स । स0 । स । स । स॥

इति त्रयोविंशति संकेताः ।

निजनिजमेले शुद्धास्तीव्रयाद्याश्च ये यथैव स्युः ।
सरिगमपधनीति पदैर्ज्ञेयास्ते लाघवायोक्तैः ॥ ३० ॥

इति शुद्धविकृतस्वराणां ज्ञापकचिह्नम्

रूपगत्वादिषु सह्यं सूत्रत्वादिह विभक्तिराहित्यम् ।
वादनसिद्धयै रचितं मयेति पूर्वैरनुक्तमपि ॥ ३१ ॥

इति पुनरपि ग्रन्थकर्तुः प्रार्थना ।

मध्यमिकाग्रोद्‍रतः क्रमाज्जठरपृष्ठतश्च तर्जन्याः ।
वाद्योर्ध्वतन्त्र्यपि सह श्रुत्या पृष्ठया कनिष्ठायाः ॥ ३२ ॥

स्थायादिष्विति नियतं यथेष्टमन्यत्र मध्यमोपजयोः ।
उदराभ्यां पृष्ठिभ्यां चतुर्द्रुतहतिस्तु कर्तव्याम् ॥ ३३ ॥

दक्षिणकरप्रचारो गदितो विस्तरभयादियानेव ।

इति दक्षिणकर प्रचारः ।

अथ सव्यहस्तकृत्यं कथयाम्यूर्ध्वासु तन्त्रीषु ॥ ३४ ॥

मध्यमया चारोहः स्थाप्या पूर्वे च तर्जनी तूष्णीम् ।
उक्तभिदां सिद्ध्यै प्रायस्तर्जन्याऽवरोहस्तु ॥ ३५ ॥

क्वाप्यारोहोऽपि तया ह्यङ्गुलिचालश्च शुद्धनाटादौ ।
मन्द्रानुमन्द्रयोः स्यात्परिभाषा वादनस्येति ॥ ३६ ॥

इति सव्यहस्तकृत्यम् ।

अथ शंकराभरण इति

समगमरिग०रिस०० समगमरिग० गरिग ।

मप०सि धं ०नि सिसिंधपमगम-

रिग०गरिगमप०सिंधपमगमरि ॥ ३७ ॥

ग०ग रि ग मप०धंधपमगम-

रि ग०ग रिग०मपमपगमम रिग०रिपग ।

मरि ग0समरिग0रिस रि सरि0-

गरि स निस ध निस ध0 पम0 ध नि स ॥ ३८ ॥

ध निस*ससरिगममप धनि सि-

रि रिसनिसध0पमगमरिग0रिस* ।

सरिगमपधनि सरि स धनि-

सरि सनिधनि सरिस निस धनिस ॥ ३९ ॥

रिसनिसधपमगमरिगम-

रिसनिसधनिसरिसनिसधनिसरि सनि ।

सधनिस* सन्त्यपराणि

प्रदर्शितं तदपि दिङ्मात्रम् ॥ ४० ॥

(२) वेलावली सरिग0धप0-

धधपमग0रिस*स0रि ग प0म ग प0म ग म0 ।

गरि0स*स0रिग0प0म गप0ध स0-

निस0निधनिध0ध सनिध0पग0रिस* ॥ ४१ ॥

स0रिगप0मपध0पधप0म ग-

रिग0रिसस*ससरिमपप0धधनिनिधप0 ।

मग0रिस*सरिग0धप धधप-

मगरिगग रि0स रिरिगग रि रि स* ॥ ४२ ॥

स गगरिसरि० ध०स०स०निधप०-

धप स०स०ॐ (३) भूपालिका स०रिग ।

प०ध० स० स सध ध प०पपग०ग-

रिरिरिगगरिरि स स०सरिसध प० ॥ ४३ ॥

ध स०रिसरिग००गपध स सरि-

रि स रि ग ०रि स रि स ध ध प०पपध प ग ग

रि०रिग गरि रि ससरि ग गरि-

रि स सॐ ग प गपध सधस रिस रि ॥ ४४ ॥

सगरिसॐ (४) ललिता सरिगम-

पगरिगरि स नि० सरिगपमग रिगरिसॐ ।

गमपगमधनिस रिनिधम-

ग रिरिसनि० सरिगरिगपम० रिसॐ ॥ ४५ ॥

(५) अथ वसन्तः स०रिग०म०

धप०मप०मगमधमधनिधनि स स०स ।

स म ग ग रिसनिस०निधमध-

मधनिध०ध नि स सस० निधप०मप० ॥ ४६ ॥

मगम0मग गरिस*स निधप-

मप0मगम0धप0 मप0 मग0म0 मग गरिस * ।

(६) हिन्दोलः सग सगम ध-

मधनिस0 ग स ग निस ग0स निधध0 ॥ ४७ ॥

मध मध निधधनि स0सनिध-

निध0मग0मग0स* स निधनिध0मग0मग0स * ।

सस गग मम धधनिनिस0 स0-

निधनिध0मग0 मग0स0 गसगनि0 स* ॥ ४८ ॥

(७) ललितो विभासभेदो

ग0पधस0 ग रिनिध0मग0रिस* ग0पधस0 स ।

नि ध0म ग0रि स* स रि ग0 सनि ध0-

ध धु नि सरिगग0 ममगमगरि0ग ॥ ४९ ॥

ममगरिस* गम0ध0 नि ध0निनि-

धपमग0रिस0*स रि ग0 सनि ध0 धमनि ध म ।

गं रि स नि ध0ध ध नि सरिगग0-

ममगमगरि0गम ध0 म ग ग0रि स* ॥ ५१ ॥

इत्युषसि गातव्याः सप्त रागाः ।

---

(१) जैताश्रीः सगरि स0गप0-

म म ग0रिस0पम0पग0रिस0 पमगरि स0म ।

गरि स0 ग0रिस* गगमपनिस0-

ग0रिस0नि0स-स निधप0म0सनिधस ॥ ५१ ॥

निधप0 म 0निधप0 म 0गम0निध-

प0म गरिस*धनि0सगगम0 गरिस* सगम ।

प0 प प म0 म प0 प0म ग0रि स0स*-

ग0मपनि0ग0 रिस0 निस सनिधप0म ॥ ५१ ॥

सग0रिस0 पनि0स* (२) धनाश्री-

गम पप मगस0 पप मग स0सप0 मप0प ।

मगस* गसगमपनिपनिस-

सनिपमगस*गगमप0मपनिप ॥ ५३ ॥

नि सग सनिपमगस* सगस-

गमपम पनिपनि स0ग स सनिसनि ग स ।

नि स गस निग सनिपस-

निपनिपसनिपमगमगपमगप ॥ ५४ ॥

मगपमगमगसप0पग0स-

ग सगस ग सनिप म ग सप0 मपमपम ।

पमपमपनिपनि सग स ग-

स ग स गसगसनि प मगससप0* ॥ ५५ ॥

ग म प निसप0निस0ग म प म-

ग0रि सग रिनि0स0प0निसप0सनिपमगम ।

पमग0रिस*सपमपगमप-

मग0रिस0गरिनि0स0स0प0निनिप0स* ॥ ५६ ॥

(३) भैरव एष धo निसनि रिo-

सo धo नि सoध प मo म धo निसoम गo रिoस*सगo ।

मप मप धoमपमगoरिरिoस*-

मधनिस नि रि स स ध नि स ध मo प ॥ ५७ ॥

म ग oमसधoपमo म ग oमपम-

धपध मपम ध प म प म ग o रिoस* ध धoनि ।

सo म ग रिस निध धानo स रि ग-

रि स निधधनि स रिसनि सनि ध ध ॥ ५८ ॥

पमoम गo मपधoमम गo रि oस*-

(४) पौरविकाऽथ सरिoमग रि ससरिसoनि ।

सगमगमoनिधप ग मoमग-

मगरिस* सरिमगरि ससगमग ॥ ५९ ॥

मoम स स नि धoप मम गमoग-

रिस*सरिमगरि स सगमगमo म स सनि ।

ध धनि स नि ध॰धधसनिध नि-

धम ग गगपमगमगरि स॰सरि ॥ ६० ॥

स0गम0गरिगरिपपप म0ग-

रिस*स0गमप0निधप प0म0गरिस0ग0रिस॰ ।

इति प्रातर्गातव्याश्चत्वारो रागाः ।

(१) तोडी तु ग0रि ग0रिस0सरि-

पम0ग0रिग0रिस0॰सरि ग मधमनि ॥ ६१ ॥

निध प0मग0रिस* ग0रिग0रिस0-

नि0धनि0 गरिस॰ सरि गम निधप0मग0रिस॰ ।

सरि ग सनि ध0 धधनिसरिग-

गरि ग प निधप म ग रिग रि ग॰0स*रि0 ॥ ६२ ॥

ग म निधपमग रिग0स॰ध नि-

स0 गरिसनिधधनि स0रिनिधपमग0रि0स॰ ।

(२) पश्चात्तुरुष्कतोड्ये-

पा ग0रि सरि0स निस0 निधनि0सनि0 ॥ ६३ ॥

गरि0स* सरिगमप0म0निध0प0-

मपप0मग0रि0स नि स*पमगगरिसनि स* ।

सनि0ध0प0म0ग0रि0स नि 0 स* सरि-

गमप0म0सनिनिधधपपमम ग ॥ ६४ ॥

गरि रिस सनिधनिसगरिरि-

सस*सरिगमप0मसनिध पपमगरि0सग ।

(३) मल्लारि ध सरि0 प0पमरि0-

स*धसधसरि0मरिमपध0मपध0 ॥ ६५ ॥

स0धरिस धप म रि सधपम-

पध0मपध0स*धसधसरिमपध0मपध0 ।

पध0स0धरि स ध प मरि0 ध0प-

धप धप धप धप धप मरिमप ॥ ६६ ॥

म०मप ध०० रि रि स० ध ०प०० म प ध०

पमगमप०पपम० ग रि० स ❀ पपपपमरि ।

ग रि म प० मप० म ग ग रि स०स❀-

रिमपधप०मप००मग रि सरि० ध०स० ॥ ७० ॥

प ध० म प ध०रिसरि० ध०ध धस❀-

इति संगवे गातव्याश्चत्वारो रागाः ।

---

(१) गोण्डस्तु रि०प म० पध०धपधनिपम०ग ।

रि० धसरि प मगरि०धसरिप-

मगरि स०सरि ग रि० स❀ मपध० स स ॥ ७१ ॥

नि सं रि ग रि०स०ध०रि० स०निधप०-

म प ध रि स०निधप० म पधस०निधप० म० प ।

ध००धपधनि प म ०गरि० धसरि-

पम०गरि स०सरि ग रि०स०धरि०स ध ॥ ७२ ॥

प०ध प ध०स॰रिमपधपधप-

मगरि०स०मपधपमधपमगरि०म०धस ।

रि०रिपम ग रिस०रिगरिगरि०-

स०धसरि०प ध पधपधमम ग रि०स०रि ॥ ७३ ॥

गारगरिस॰ (२) पूर्वगौडः

पधस ग०मप०धनिधप०मग०मपधपम० ।

गरिसस॰स सग०मप०स०निध-

पम०गमपधप०मग०रिसग०रिस॰ ॥ ७४ ॥

(३) देशीकार सगम०धप-

मम०ग०रिनि स॰सगम० धपध मपध०म०ग ।

रि०स॰ सगम०प०ध०म०प०पमप-

धनि० स० गरिनिधप धम०प० मपध ॥ ७५ ॥

नि०स०रिनिधपधम०प० सनिध-

पधम०प०गम०पसगम०निधम०गरिनि स॰ ।

प0ध0म0प0प मपधनिस ग रि-

निध0प0ध0म0प0पमपधनि सनिध ॥ ७६ ॥

प0ध0म0प0सनिधपध0मप0स-

ग म नि धमग0रि0नि00सरि ग धपमग0रिस ।

(४) शुद्धवराटी रिमरिम-

पध पधमपधनि0स0ग रिनिधप ॥ ७७ ॥

धध प म गरि0ग म निधनिध-

म ग रिनि स*ग म नि ध निधमग रिम ग रि ।

स*ग म निध प म ग0रिग0रिस0-

स0ग रि स नि0 प0नि0स*रिमरिमपध ॥ ७८ ॥

धम0पध नि सनिधपधम0प-

धनि0सग रिरि रि नि ध ध ध प म ग रि0पम ।

ग रि0गरि रि स नि0 ग रिस0रि0स*-

इति मध्याह्ने गातव्याश्चत्वारो रागाः ।

बहुली सरिसरिगपग0पधस0 ॥ ७९ ॥

सधपगरि0स*सरिसरिग0ध-

पग0पधस0 सरि ग प ग रिस रिनि0 स सध

पगपध ध प ग प रि ग स रि-

नि.स सधपगपध ध ग रि ग स रि ॥ ८० ॥

नि0स सधपगपध स रि स रि-

नि0 ससधपगपध ध स सधपगरिस*स ।

रिगधपगरि ग प गरिसरि-

नि0स*गप0पपधध0ध रि0नि(ससध ॥ ८१ ॥

पगरिसप0गपगपगपग-

रिसरिसरिगपगपधस*ध0रि0 सरिस ग ।

रि स रि स गरि सरि स गरिस-

रि सधपधधसधपगपगधप ॥ ८२ ॥

गरिपगरिगरिपगरि गरि-

पगरिगरिपगरिगरिसरिनि स0स~स स* ।

(२) सारङ्गः स0रिग0पमग0-

रिस* स0रिग0धपमम0रिस* स0रिग0 ॥ ८३ ॥

धपधग0धपमग0गपध0स0-

निधस0धधप0ध सधपमग0रिस0स0धप0

धपमग0ग प ध0सनि ध रि0 स*-

सरि सरि प0धप0धधपमगरि0स ॥ ८४ ॥

स0सरिप0पमपधनि0 रि सरि0-

स0नि0ध0प0 पमप0ध0स0नि0ध0प0पमप0ध0नि0 ।

ध0प0 म प0प म ग रि ग0रिमप0-

म0 नि0धप0मगरि0सरिस0धपमग ॥ ८५ ॥

रि0स*(३)नटनारायण इति

स0रि0 ग0पमग रि0स*स0रि0 ग0धपमग

सपमपमग0म प प ध प म0-

गरि0रिगमगरिस0सरि0रिम0गम ॥ ८६ ॥

ग रि0स स नि0सरिरि म ग रि0स0-

प0 नि0सरिम ग0 धपमगरि0स0सरि0रि0रि0 नि ध

पधमधपसगमपधरिस-

निधपमग धपमगरिस पनिस ॥ ८७ ॥

म प ससरि रि निधपमम ग-

ग पपमग रिसनिसरिमगरिससरि ।

रि गग पप धधपमगमप-

धप मगरिससरि पम ग रिरि स ॥ ८८ ॥

(४) देवक्रीः सपमपगम-

रिससपमपगममधमधनि सरि रि स ।

सधनिसधपमपगमरिस-

ससरिगमपधनि सनिसगनिस ॥ ८९ ॥

निसनि सरि सनिसधनिसध-

पमपगमरिस स

इत्यपराह्णे गातव्याश्चत्वारो रागाः ।

(१) ततस्तु सौराष्ट्री ।

मपधधपनिधपमगरिस-

मपधससमसरिस निधपधप ॥ ९०

धधपमगरिससरिगरिस

(२) गौडी तु रिमपनिसनिरि सनिधपम

गरिम ग रिगरिसपनिसरि ।

निरि सनिधपमगरिम ग रिगरि ॥ ९१ ॥

सनिसनिससनि सनिपमग-

रिम ग रिगरिसस सनिपमगरिम ग रि ।

ग रिसमपनिसरिगरिमप-

निसपसनिपमगरिम ग रिगरि ॥ ९२ ॥

ससगमनिधपधपमपग-

मप म ग रि प मग रिम ग रिगरिगरिस

ससऽस निपमगरि0म ग रिस-

रिनिस0रि म ग रि स रिनिस0रिमग ॥ ९३

रिसरि निसनिधपम0पान0स*-

रिमपनि0 स0रि0निध0म0गरि0गप म0ग रि0स* ।

(३) चैती गौडी तु रिमप-

नि स0निरिनि रि सस0निरि सरि0 निस ॥ ९४ ॥

निरि0 सस0परि0 स0 निधप0मग-

रि0स0निसनिरि0सस* स ग0 म प धप म पम ।

ग रि0गरि नि0प म पमग रि0 रि0-

स*पपपपम ग0 मप ध0 प म पम ॥ ९५ ॥

ग रि0रि0स* (४) पूर्वीयं तु स-

गमप0म ग0ग प0म ग0रि0ग0रिस*गम0निप0 ।

म ग ग0प म ग0रिग0रिस0सस0-

नि ध0नि0धसस✻गमपधस0 ग गरि ॥ ९६

स0 स स स सनिधपमग0गम-

पधनिध0प पपधधनिधधसनि ध प0 म0 ।

ग म प प म ग0गगपम ग0रि-

गरिस✻म प स0 ग ग रि स0रिस0 स स ॥ ९७ ॥

निधपम गमपधनिध पध-

स0 स सनिधपमग0 ग गपमग0रिगरिस0✻

स0पम0ससग0मपधस0 स स -

नि धपमग ध प म गपम0गरिम ॥ ९८ ॥

म ग रि ग0रि0स✻ सरिसरिगग-

पमनिधप म गमगपम गमगरिगस0 ✻ ।

रि ग मरि0 सनिऽ0रिसनि0रिस0नि-

प0निऽ0स0 नि प0मप0 नि प0प0निऽ0स0सस ॥ १०२ ॥

ससरिगमपधनि सनिसनि-

सनिसनिपमपमपमपमपमपम रि ।

गमरिसनिऽ0स* स॰ संस* दि्गि-

(२) त्वाभीरी तु ग0मपधप0म ग0 ॥ १०३ ॥

रि0 स निऽ0स*ग0मपनिऽ0स0 ग0रि स-

निऽ0स0 स सनिधपमग0मपम प ध प मग0 ।

रि स निऽ0स0धप0म ग रि सनिऽ0स*-

गऽ0म0पनिऽ0स0 मम ग गरि रिसनिऽ0स0 ॥ १०४ ॥

रि स निनिऽ0स॰ स नि0धपमगऽ0म-

पनिध0प म गऽ0मपम प धपम म गऽ0मप ।

मप धप म ग२०ग रि स नि२०स०स० *

(३) कल्याणः सगमप० म ०गरिस* ॥ १०५ ॥

ग०पमगपमगरिस० मगरि-

सरि ग०गग०मम० गमगरि० ग०म मगरिस० ।

नि धनि० धपध०स* सरिस ग ग०-

रिसरि०स*ग०म प नि००रि रि सनि०निध ॥ १०६ ॥

पमग०रिस* ससगमप०म ग०-

म ध०प०म ग मगरि० मगप० मगरिस०पप ।

मगमगरि० मगप० मगरिस०-

पधरिसान०ध०नि०स*स०निरि स नि ध ॥ १०७ ॥

प म ग० रिस०सगमनिधनिनि-

ध प मग०रिस*सरि ग प०पध०पधप म प०० ।

गरिस*सरिग०धप म० ग रिस-

रिसग रि०स* ससरिगमपधनिध० ॥ १०८ ॥

धनि०० गरिस रिसनि० स सनिध-

प०मग०ग०रिसरि०स*सरिगमप०पध०सरि ।

स ग गरि सरि स नि ध प०प ध०-

रिस रि स नि ध प०प ध०निपधप०म ॥ १०९ ॥

ग०ग०रिसरि०स०सनिध०प ध०स*

(४) श्रीरागस्तु रिमप नि स निधपमग

रि०मप०रि०पमगरि०मग०रि०स*

रिरि०मम०पप०निनि०स०निसरिरि० प ॥ ११०

म ग रि०म ग रि०रि० स स रि स रि-

निसनि रिसनिधपमगरि०रिमप०नि० स० रि ।

ग रिसनिधपमगरि० रिमप०-

नि स निधपमगरि० रिमप०नि ध प ॥ १११ ॥

पनिधपमगरि मप०स०निध-

पमगरि०मप०रि०पमगरि०मगरि०रि०स*रि

पमगरिपमगरिरिमपनिऽ०

सरि० रि स नि ध प म प म रि० प ध प ॥ ११५ ॥

म ग रि रि स नि ऽ० ससं५ * (५) मालव-

गौडोऽथ नि सरि०पमरिमपधरि रि रि

स रिस नि ससनिमपस स स-

नि०पमरिगगरिग म मरि०ससरि ॥ ११६ ॥

स नि स०गरिगम०सरिसगरि०-

स०रिसरिस नि स०ध०नि निध नि स स*नि निस ।

रिपमपगम०रि०गगरिग म-

प०मध ध पध निधपमपग म०रि० ॥ ११७ ॥

गरिग मप०म ध धप प धम-

पमधपमप गम०रिप०मप गम०रि ग ग ।

रि ग ममरि०स०रिसरि स नि०स०-

प०नि निप नि०स* नि सरि०प०मप०रिम० ॥ ११८ ॥

सरिसम रि०सरि०नि०स* नि सरि०-

पमरिमपस सनिपम०रिमपनिपनिम

पम निपम०रिपमपरिमस-

रिसम०रिस०रि०नि निस*प०रि०सरिस ॥ ११९ ॥

रिसरिसरिसरिमरिमपप-

मरिमरिमपनिपनिस* (६) अथ गौडोऽयम् ।

सरि०प म० ग रि ग मरि०स*सप-

मपगम०रिगम०रि०स*रिगमग रि ॥ १२० ॥

ग०रि०स०रिगम ग रि०स०सग०स०-

निरि० स धनिध०प००स०*स नि०रिग०धपमगरि ।

गरि०स*गमप ध०रि सधपस-

सधप०गम प ग पम ग रि०ग०रि०स* ॥ १२१ ॥

सरि०प००पधपध०पप०गरिस॥

सरि०म०म०ग रिगमग०रि०ग॥रि निमधप००स० ।

रिगमग० रिग०रि०स०रि नि सध-

प००स०रिगमग रि०स०रि नि सधप००स॥ ॥ १२२ ॥

धपमप गमपधनिस रिनि-

सधपमप०गरिस॥

इति प्रदोषे गातव्याः षड्रागाः ।

(१) ततस्तु कर्णाटः ।

नि नि०स०मगरिस०नि नि०सरि०प-

मगरिस०नि नि०ससरिगमगरिस० ॥ १२३ ॥

नि नि०स०गरिसगरिसनि०धप-

म०प० मरि स०नि०ध०पम०प०पपधनिसरिग

गमगमगमरिग मरिमग-

0 0 0 0 0 0 0 C 0
रिसनि0ध0प म0प00मरिसनि0ध0पम0 ॥ १२४ ॥

0 0 0 00 0 0 0 0
प00रिसनि ध0पमप00सनिनि0ध0

0 00 0 0 0 00 0 0 00 0 0S
पमप00पधनिनिपनिधपम0प00सनि00रिस

0
रि0स॰ससरिगमपधनिसरि-

ऽऽ
रि सनिधपमग0रिस॰गग प0सनि ॥ १२५ ॥

धपमगग00मपधनिसनिध-

ऽ ऽऽ
पमगग0मपधनिध पमगगमनि0 गम ।

ध0गम0निधपमग0रिस॰रिग-

मप0निधपममनि0ध0पधनिसरि ॥ १२६

0
रि सनिध0 प ध0नि स रि स नि0ध-

0 0 0
पनि0ध0प म0 प0निध0पमग0रि स निस॰पनि ।

प0निसरिग0रि स0सरि ग0ग0रि-

सरि म0ग0रिस0सरिम0सरिनिसनि ॥ १२७ ॥

ध0पम0ध0निस0निरिसरिनिस-

निधप0प-म0गरिसरि0स*पनिप0निसरिग0

रिस0सरि ग0ग0रिरि ग0ग0रिस0-

नि सग गरिस0नि सरिरि स0नि00रिस ॥ १२८

नि पम0 धनिरिसनिस0निस0नि-

धप0रि0स*ससरिगमपधनि0स0नि0ध प म0

म0ग रि स सग म पपधधप0-

म0 ग रि स नि0ध0नि0स*सगरिस0ग0म00 ॥ १२९ ॥

गगरिस0पम0पग0रिस0मग-

प0ग0मगरिस0पमगरिस0सगरिस0ग0प ।

सनिध०पम०पनिध प० मप०म

ग रि मप०नि०ध०पम०प०स नि०ध०पम० ॥ १३३

ग०रिस०रि०स नि०स० पनिसरि०स*

(३) वर्णादिनीट एष ग गै०म०प०म ।

प०पमरिस०रि ग म ०स०पम-

रि०स* ग ग०म०प०मप०गमपधनि स ॥ १३४ ॥

रिस रिरिनि सरिनिसनि सरि-

सनि०ध०ध०प०मप० रि स०नि०ध०प०मप० सनि०ध०

प०मप०गमपधनिधप०पनि०-

ध०प०मप०पमरिस०रिग म ।१०स० नि ॥ १३५ ॥

ध०प०मप०प नि०धपमप०पम-

रि०स*(४)हम्मीरस्तु गमप०ध प०मप०प० ।

निसनिरि0स॰गमप0स सनिध-

पगम प0ग मगरि0स॰गमप0 सनि ॥ १३९ ॥

ध सनिधप0ग म प 0गमग रि0-

स॰गम प धनि स नि ध प 0 म ग 0ग गप म ग0

मगरि स0निसनिग0 रि0स॰गम-

प0स नि ध प0 म ग0 रि स0निसग0 रि स॰ ॥ १४०

अयमेवमेव रूपैः

कैश्चिन्छारिमेल उद्धार्यः।

(६) तदनु विहङ्गड इत्थं

रिमम0मपमपनिधपमपमग0 ॥ १४१

रिसनिस0॰रि पमपम0ग0रिस-

निप0पनिसनिसरिमग0 रि ससनिस॰सरि।

सरि मग0 रि ससनिस॰रिमम0

ग रिगरि0पमग0 रि सनि0स0रिपम ॥ १४२ ॥

ग0रिसनि0स*पनिसनिस0रेप-

मगरि सनि0स*रिमम0पधनिध0प0म गग0 ।

ग रिगरिपमग0रि ससनि0स*

रि पम ग0रिसनि0स0निध पनिनि0स* ॥ १४३ ॥

इति निशि गातव्याः षड्रागाः

(१) शुभकृदथ मालवश्री-

निधम0पम0ध नि सनिग रि गमिधनि स स

स म ग सरि गस निधनि सनि

धपप पनिधगग0म0मग0स*गरि ॥ १४४ ॥

ग म नि धनि ध ममग0रिस* प

मग0रिस0स0गम प0ग0रिस0स0गम0.

सम0 ग0रिस*पनिस0नि निधप0

म पमग0रिसस0सगरि ग म0 ग0रि0 ॥ १४५ ॥

गमनि ध नि ध ममग0रिस॥प-

म प0मग0रिस0स0गम प0मग0रिस0सगम0 ।

सम0 ग0रिस॥पनिस0प स0नि नि-

ध प0म प मग0रिस0सगरिग म0ग0 ॥ १४६ ॥

रिस॥ पम प सनिधप0 प म प-

नि सनिधप0 प म पनिधनिस सनिधप0

प मपमगम0मगरि ग म नि-

धनिधप मग0रिस0गपम ग रिस॥ ॥ १४७

(१) धवला सगमप0 म गम0ग0-

रि स नि0सगमगमपमप ग0रिस नि0 स॥ ।

गमपनि स स0ग॰0स निस निध-

पमग0ग0मगगमप0मगरि सस॥ ॥ १४८ ॥

स ग म पॖ0पम मप0 प म ग0 रि-

स नि0सरि म ग0ग म प म0निधपम0पमग0

रि स0*स म ग0रि सनि गमग म·

पमप म ग0गम नि ध पम ग0रिस ॥ १४९ ॥

(३) एषा तु मुखारी ससु-

धधस रि मम0 प नि धपमधपमग0रिस*

ग रि ग मपध पमगरि0सनि-

स0रि ग म पम गग0 रिरि0 सनि निस* ॥ १५० ॥

(४) रामक्रीर्गप0 धरि स स-

रि गऽ0ग0 रिस0रि सनिधप0धप0प0मग0*ग प0

ध स0स सनिधप0 ध पप0मगऽ0

रिस0*रि0ग0धपमपमगऽ0रि स0रि0स0 ॥ १५१ ॥

स0रि0 गप म ग0मग0रिस*गप-

धध0सनिधप0 म ग प0गध0 धनि धनि धम ।

पनिप0 म ग0प0गप0गध0प0 म-

गप0गप0 ग 0स0रि0ग0धपममपम ॥ १५२ ॥

ग0पमधपमग0रि सरि0स*ग-

पध स सनिध प0म ग0मपमप धपम0ध

प म ग0रि स0रिगरि0ग प ध0ध-

प प ग0 रिस0ग पध नि ध प ग0गरि ॥ १५३ ॥

स0सरि गप0 म ग0म ग0रिस0*

(५) स्यादेवं पावको ग0ध0प0म0ग0 म

म0प0प0म0ग0रि0 गध0प0म0गरि-

ग प मम म० गरि0स0धस0रि ग0 रि0स* ॥ १५४ ॥

स0 सनि0ध प0 म पधधप पध0-

धप म0ग0रिसध0रि0स0निधधपम0पधस॥

मपध सस0निस रि ग0रि0 स0ध0-

रि0स0निधप0म पधरि0स0सनिधप0 ॥ १५८ ॥

मपध स सनिधप0 म प धध-

प म0प पमग0ग0ग0रिस* मपध0स0सनिधप0

मपध0 सनिधप मपध0 रि स-

निधपम0 पनि ध पम0गरिसरि0स ॥ १५९ ॥

रिगरिमप धध प प ध00धप-

म0ग0 ग0रिस॥पपपपमप0म0 ग रि0म प0 म0 ।

ग0 ग0रिस॥ममममपपधध-

स स स सनिधपम0प0म0ग0गरिस॥ ॥ १६० ॥

रिमपधे0प0मप0रिपपमम-

म0 रिरिस0रि00स*रिमपधधपप0सनिध प ।

म रि0धध प0 मरि0धप मरिरि0-

सनिधपमम0रिरिस0रि00स*दिगियम् ॥ १६१ ॥

(८) देवादिकगान्धारे

रिमप0ध0प0म0 ग रि0स0रिम0 ग रि0स*ससरि0 ।

मप0पप0ममधप म0ग रि0स*

रिमप0 धस0रि0 स नि ध0प0म0ग रि0स* ॥ १६२ ॥

सरि0 म पपप म म धधपध-

प म0मगरि0स*रिमप0ध0स रि म म0 ग रि0स0

स निधध स0नि0रि स नि धप0म0-

गरि0स स निधधस0नि0रिम ग रि स* ॥ १६३ ॥

(९) मारविका गमप0म0ग00म-

प0निधपमग0स*गमप0स0 सनिधपमग0 ।

मप०म०निधपमग०स* निपध-

म०मपनिध०प मग०स०म०प०म ग०स* ॥ १६४ ॥

गमपधनि ध ध स सनिधप-

म०ग०*मपम०प ध पम ग०ग०स* पनि००सगम

पमम ग ०पमनिपम०ग०स*ग-

मपम०ध०पम०मपनिप०म ग ग स* ॥ १६५ ॥

(१०) परजो गमपध०ध०पधप-

पनिधप०धप०पग०रिस*गमपध०पध०स०

म० ग०रिस०निधप०धम०पग०म०-

गरिग०म०ग०रिगरिरिमग०रिसस* ॥ १६६ ॥

इति सर्वदा गातव्याः दशरागाः

रूपाण्येवं मध्यप्राधान्याद्दर्शितानि यान्येषाम् ।
मन्द्रे तारे च यथासंभवमिति वादनायानि ॥ १६७ ॥

इति वादनस्य परिभाषा ।

उक्तं रूपमनेकं तत्तद्रागस्य नादमयमेवम् ।

इति रागाणां नादमयरूपाणि

अथ देवतामयमिह क्रमतः कथये तदेकैकम् ॥ १६८ ॥

गलराजिकमलराजिर्भाले भसिती रतः सदा नृत्ये ।
सुन्दरगौरः शोणाम्बरधरणः शंकराभरणः ॥ १६९ ॥

वेलावली विनीला तालीवनचारिणी तरलहारा ।
तरुणान्वेषणकरुणं करतलधूनतद्दलाभरणा ॥ १७० ॥

दोलालोला विपिने तरलितवलयं विभूष्य भूपाली ।
कान्ते प्रनितात्यन्तं कुङ्कुमपीता स्मराङ्गीता ॥ १७१ ॥

नीराजयत्युमेशं द्वापैरनिशं निशात्यये ललिता ।
विविधालंकृतिमिलिता च लितश्वेताम्बरा गौरी ॥ १७२ ॥

केशगकिंशुक एष प्रवेशिताम्राङ्कुरः पिकस्य मुखे ।
अरुणवसनैर्लसन्तो गौरसुवेषो रसालगतः ॥ १७३ ॥

मालामशोकचम्पककमलानामुद्वहन्महाभूषः ।
ललनान्दोलितदोलालोलो हिन्दोलको गौरः ॥ १७४ ॥

कुटिलो ललितो ललिता विभातयातो विनीततां नटयन् ।
निह्नुतपररतिचिह्नो गदति वधूं चटु पटुः खिन्नाम् ॥ १७५ ॥

एषा माथुरवेषा विशेषपटुरकटुदेशभाषाभृत् ।
स्वेशे मदनावेशं करोत्यलेशेन जैताश्रीः ॥ १७६ ॥

दूर्वाभविभा विरहासहा लिखन्ती पटे पतिं रुदती ।
स्नपितकुचा सितगल्ला स्थिरधम्मिल्ला धनाश्रीः स्यात् ॥ १७७ ॥

डमरुत्रिशूलधारी पन्नगहारी सितो लसद्भसितः ।
धृतशशिगङ्गोऽतिजटोऽजिनिविकटो भैरवोऽसमदृक ॥ १७८ ॥

तनुगौरी पौरविकाऽऽयतवेणीमिलितकञ्चुकीबन्धा ।
दोलान्दोलनलोला नीलनिचोला मधौ मुदिता ॥ १७९ ॥

कलितविपञ्ची विपिने लालितहरिणाऽरुणाम्बरा हरिणी ।
धवलाङ्गरागरचना मृदुवचना भूषिता तोडी ॥ १८० ॥

आयतनीलनिचोला करमालाजप्यमानपतिनामा ।
विरहातुरोच्चगौरी तुरुष्कतोडी महावेणी ॥ १८१ ॥

नीलो घनान्तरालोल्लसितः पीताम्बरो वरो वीरः ।
मृदुहसितोऽतिपिपासितचातकपोष्येव मल्लारिः ॥ .८२ ॥

नटमल्लारिरनीलो नृत्यन्कुतुकेन नर्तयञ्शिखिनः ।
कलितकदम्बो ललितो मिलितालिः सौरभात्सहजात् ॥ १८३

पलितकचाहितबर्हः सकुटजमालो धनुःशरौ कलयन् ।
गोण्डः किरातवेषो गैरिकरेखोचितोऽलिनिभः ॥ १८४ ॥

तरुणोऽरुणवसनयुगो हरपूजामम्बुजस्रजा रचयन् ।
कमलदृगुत्तमवेषो विधुमधुरः पूर्वगौडोऽयम् ॥ १८५ ॥

मणिमयमुकुटो हारी विचित्रवासा लसन्गतावलसः ।
अरुणः कृपाणपाणिर्देशीकारः सरोजाक्षः ॥ १८६ ॥

तरुणी वने सकरुणं गवेषयन्ती पतिं भृशं गौरी ।
नीलाम्बरा वराटी सुरतरुकुसुमोल्लसत्सुषमा ॥ १८७ ॥

श्यामा चलधम्मिल्ला तन्वी ताम्बूलिनी सुकञ्चुकिका ।
बहुलीलेयं बहुली विलोलचैलाञ्चला सुगतिः ॥ १८८ ॥

पीताम्बरोऽसिततनुर्ललितालंकृतिरुपेतचापेषुः ।
सारङ्गो गरुडाङ्कोऽम्बुजकम्बुगदारिधारिकरः ॥ १८९ ॥

इन्दीवरतनुरञ्चत्पीतदुकूलो मणिस्फुरन्मुकुटः ।
नटनारायण उच्चैः कुण्डल ललितो मुदा नृत्येत् ॥ १९० ॥

भासुरतनुरनुगतसुरनरसूनाऽनूनसौरभा सुमुखी ।
देवकृतिरतुलभूषा मणिमयसिंहासनासीना ॥ १९१ ॥

चित्राम्बरातिगौरी मेचककञ्चुकिकयाऽतिगूढकुचा ।
शोणरदा विधुवदना मदनार्ता याति सौराष्ट्री ॥ १९२ ॥

क्षीरोदभासिवासाः सहजसुहासा प्रलम्बबाहुलता ।
करधृतसरहिच्छत्रा गौडी गौरी सरोजाक्षी ॥ १९३ ॥

श्रुतिकृतरसालवल्लरिररुणाम्बरगौरतनुरभीष्टवना ।
पिककलगलरवविच्चा च्चित्तहरा कीर्तिता चैत्ती ॥ १९४ ॥

यावकयुक्तरचरणा बह्वाभरणा कृतेशहृद्धरणा ।
दूर्वाभतनुरखर्वा चार्वी बहुगर्विता पूर्वी ॥ १९५ ॥

कदलीमूलासीना पीनकुचाऽधीननायका तन्वी ।
कनकनिभा शुभहारा त्रावणिका वर्ण्यवेणीका ॥ १९६ ॥

पीतांशुका सुकेशी शितिः स्मरन्ती पतिं भयाकुलदृक् ।
पिकनादेन विदूना कामोदी कानने रुदती ॥ १९७ ॥

खेटककृपाणपाणिः प्रतर्जयन्वैरिणो रणेऽरुणदृक् ।
हरितालाभो हारी हयचारी धीरधीर्नाटः ॥ १९८ ॥

गौरश्यामाऽऽभेरी विनीलचैला सविद्रुमालिगला ।
ताटङ्काञ्चितकर्णा मृदुतनुवाणी सुवेणीभृत् ॥ १९९ ॥

सच्छत्रचामरोऽच्छस्ताम्बूली मौलिरत्नमालावान् ।
कल्याणः सितवासा राजा सिंहासनासीनः ॥ २०० ॥

कनकातपत्रमूले लोलदुकूले गजाश्रयो राजन् ।
श्रीरागोऽखिलभोगो नीरजराजिं भजन्मौलौ ॥ २०१ ॥

कान्ताचुम्बितर्लपनश्चलमौलिः किमपि कुण्डली शुकभाः ।
नर्तनशालाशीली मालाभृन्मालवो मत्तः ॥ २०२ ॥

कुङ्कुमकुसुम्भजाम्भः कणकीर्णसिताम्बरः परं सुरभिः ।
मृगमदतिलकी ललितो मालाताम्बूलवान्गौडः ॥ २०३ ॥

सासिगजदन्तपाणिर्नीलगलो मीनभूषितः कर्णे ।
शृङ्गारवीरवेषी कर्णाटो योषितामिष्टः ॥ २०४ ॥

कुटजस्रजा विराजन्कुन्तीकृतकेतकस्फुरन्मकरः ।
अड्डाणो घनवर्णो रमते रतिसंगरे नितराम् ॥ २०५ ॥

हारी गौरोऽरुणदृग्धिमसितवसनोऽच्छपाटलोष्णीषः ।
छायानाट पराख्यः सुवर्णनाटो भटो रसिकः ॥ २०६ ॥

रसिको युवा सहासोऽरुणवसनो दण्डकन्दुकी कुतुकी ।
ताम्बूलरुची रुचिरो गौरो वीरस्तु हम्मीरः ॥ २०७ ॥

जटिलोऽहियोगपट्टः सविधुशकलमौलिरुल्लसद्भसितः ।
गङ्गाधरस्तपस्वी ध्यानरतोऽतीव केदारः ॥ २०८ ॥

विधुकरगौरः सुरभिः सुमनः कृतभूषणाम्बरेषुधनुः ।
विरहिजनमनोमोही विहङ्गडः कीरग्राही सः ॥ २०९ ॥

तन्वी रसालतलगा कलगाना सस्मिता प्रति स्वपतिम् ।
मृगदृक्करगतकमला मालाश्रीमौलियोल्लसिता ॥ २१० ॥

धृतनीराजनपात्रा सुन्दरगात्राऽधिमङ्गला धवला ।
पीताङ्गरागवसना चलरशना सुदशना गौरी ॥ २११ ॥

श्यामा कामाक्रान्ता कान्तवियोगासहा मुखारीयम् ।
मणिमयसुकुचावरणा वीणापाणिः प्रवीणोच्चैः ॥ २१२ ॥

काञ्चनविभाऽतिभासुरभूया नीलांशुकाऽधिकं रम्या ।
रामकृतिरणु वदन्ती सुदती दयितेऽन्तिके याते ॥ २१३ ॥

गोपालवेष एष क्वणयन्वेणुं सदा मुदा क्रीडन् ।
चित्राङ्गरागभावः पावकरागोऽसितो ललितः ॥ २१४ ॥

उच्चतनुस्तनुरतनुर्जघने शोणांशुका त्रिशूलाङ्का ।
गौरी करिगतिरभिमतयुद्धा सैन्धव्यतिक्रुद्धा ॥ २१५ ॥

चलकदलीदलमौलिर्मलयाचलगा कलक्वणन्मुरली ।
आसावरी सकरुणा वहॉली शालिनी नीला ॥ २१६ ॥

सिंहासनोपवेशी भूषाभिर्भासितः सितः कुमुदी ।
धवलाम्बरः सुरनुतः शृङ्गारी देवगान्धारः ॥ २१७ ॥

इन्दुमुखी कनकाभा दीर्घा लम्बालकाऽतुला चलदक् ।
अरुणाम्बरा नृपवरांस्त्वरयन्ती मारवी समिते ॥ २१८ ।

परज इषुधनुर्धारी हारी गौरस्तनुस्तनूदीर्घः ।
मिथ आहततालवधूशाली स्तवनेन शालीनः ॥ २१९ ॥

इति रागाणां देवमयरूपाणि ।

रागेषु देवतात्वे नाशङ्कया कापि देशजा रीतिः ।
स्पृशती भाषावेषौ तेषां देशाधिदैवत्यात् ॥ २२० ॥

इति देशजारीतिः ।

इति केचित्तेषां कतिचन रूपाणि तानि चैतानि ।
नादात्मान्यखिलानि ब्रह्मगुणवद्गणनीयानि ॥ २२१ ॥

इति नाददेवान्तरम् ।

बालिशबोधोपायो मया कृतो दक्षपूर्वपक्षोऽयम् ।
युक्त्या निजया सुज्ञैस्तथाऽपि सिद्धान्ततां नेयः ॥ २२२ ॥

स्वकृतिलतायां बहुमतमूलाया बालविन्प्रवालायाः ।
गुणितोषणकुसुमायाः सकलफलमिहाप्र्युमारमणे ॥ १२३ ॥

कुदहनतिथिगणितशके सौम्याब्दस्येषमासि शुचिपक्षे ।
सोमेऽग्नितिथौ रविभेऽकरोदमुं मौद्गलिः सोमः ॥ १२४ ॥

इति ग्रन्थकरणकालः ।

इति श्रीसोमनाथनिर्मिते रागविबोधे पञ्चमो विवेकः समाप्तः ।

समाप्तश्चायं ग्रन्थः ।

श्रीरस्तु

TRANSLATION

RÂGAVIBÔDHA

VIVEKA I.

SRUTIS AND SVARAS

Benediction

1. For the successful completion (of my work, *Râgavibôdha*), I salute Ganapati, who is the primary source of Âryâ's (i.e. Pâravati's) joy; who is the (divine) guru; who is the object of devotion to the Dêvas; and who enjoys the reputation of occupying an elevated position.

2. May Saraswati be preeminent!—Saraswati, who is Brahma's wife; who, as the Goddess of Speech, is the only source of all linguistic transactions; whose name, as such, pervades throughout the world; and who, with her own characteristic touch, casts splendour upon her Vina.

Author's Personal Reference

3. Born of the family known as "Sakalakalâ," and bearing the name of Sôma; I, son of Mudgalasoori, son of the eminent Pundit Mènganâth, am devoid of intelligence.

4. Nevertheless, having freely borrowed the essential points from ancient works, I (venture to) write *Râgavibôdha*, with a view to reconcile the conflict of views between the science and the art of music.

Metre employed in the Work

5. My work rises in eminence with the *Pathyâ*-kind of "Âryâ" Metre, coupled with a little *Vipulâ*-kind (of the same metre); and my object (*viz*, explaining all the points of music) is thereby fulfilled.

Mârga and Dêsi

6. Music is of two kinds-*Mârga* and *Dêsi*. That kind of music is "Mârga," which was sought after by Brahma and other gods, which was practised, in the presence of Siva, by Bharata and other sages, and which was therefore worthy of respect.

7. That (kind of music) is "Dêsi," which varies according to the tastes of the people of different Dêsas (countries) and which tends to fascinate their minds. Since *Mârga* almost failed to please the world, *Dêsi* has come to ally prevail here.

Contents

8. Here (i. e. in this Work), five Vivêkas (i.e. Chapters) are treated of, and should therefore be learnt, in (the following) order:—Srutis and Svaras, Vina and its varieties, Mêlas along with their numbers, Râgas, and the Râga-Forms.

Sound

9. For the attainment of all the *Purushârthas* (i.e. the four principal objects of human life, viz, Dharma, Artha, Kâma, and Môksha), an intelligent devotee must medidate on *Sound*, even though he may be desirous of serving Brahma, Vishnu, and Siva. For, those three gods have been declared (by the ancients) to be identical with Sound.

10-12. The soul, desirous of speaking, excites the mind; the mind, so excited, strikes the vital heat of the body; the heat, so struck, sets the air, remaining in the Brahmagranthi, in motion; and the air, so set in motion, rises up and passes, in order, through the navel, the chest, the throat, the head, and the mouth and also produces such sounds as are called Athisookshma, Sookshma, Pushta, Apushta, and Kritrama. Thêse sounds deserve to be sung —

Registers

Namely, the sounds that proceed from the chest, the throat and the head which are respectively called *Mandra, Madhya*, and *Thâra*. Of these, the succeeding one is twice as high in pitch as the preceding one. I shall now proceed to point out how these sounds take the form of *Srutis* and *Svaras*.

Srutis

13-14. There is, in the chest, a group of upright nerve-chords (viz, *Sushumna*, *Ida*, and *Pingala*), connected with which there are 22 delicate nerve-chords, stretched cross-wise. These 22 Chords give rise to 22 *Srutis*, of which each is higher in pitch than its predecessor. The same arrangement of sounds is found in the throat as well as in the head.

Svaras

14. From these (22) *Srutis* emanate the seven *Svaras*. They are called 'Svaras,' because they are intrinsically of a pleasing nature.

15. These seven svaras are called Shadja, Rishabha, Gândhâra, Madhyama, Panchama, Dhaivatha, and Nishâda; and their signs are respectively *Sa, Ri, Ga, Ma, Pa, Dha, Ni*.

Sudha Svaras

16. The srutis of the Sudha Svaras are respectively 4, 3, 2, 4, 4, 3, 2. These make up the total 22.

17. These (i.e. the seven svaras) are heard distinctty in the 4 th, 7th, 9th, 13th, 17th 20th, and 22nd srutis respectively.

The Allocation of the Sudha Svaras in Terms of the Vina

18. Four wires are made to run over the *Mêru* of a Vina, which will (in Vivêka. 2) be described in detail. Of these four, the first produces the lowest sound; and the other three produce higher sounds, each a little higher than its preceding one.

19. Below the fourth wire, 22 small frets are so placed that the wire, when pressed against them, produces 22 sounds, each higher than the preceding one.

